शास्त्री प्रथमवर्ष (साहित्य)

04-06-2021

व्याख्या कार्य ।

" श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि ।
वसन्ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः ॥"

पद्यमिदं महाकविमाघप्रणीतस्य 'शिशुपालवध' महाकाव्यस्य प्रथमसर्गात् उद्धृतम् । अत्र पद्ये तत्रभवान् महाकविः माघः 'काव्यं यशसेऽर्थकृते। ॥' इति आलङ्कारिक- -वचनप्रामाण्यात् काव्यस्य अनेकश्रेयः-साधनतां, 'काव्यालापांश्च वर्जयेत्' इति निषेधस्य असत्काव्यविषयतां च पश्यन् 'शिशुपालवधं' महाकाव्यस्य निर्विघ्नपरिसमाप्तये श्रीकृष्णस्य नारददर्शनरूपं वस्तु ग्रन्थादौ श्रीशब्दप्रयोगपूर्वकं निर्दिशन् कथाम् उपक्षिपति – श्रिय इति ।

अन्वयः – श्रियः पति, जगन्निवासः, जगत् शासितुं, श्रीमति वसुदेवसद्मनि वसन्, हरिः, अम्बराद् अवतरन्तं हिरण्य- गर्भाङ्गभुवं, मुनिं, ददर्श ।

व्याकरणम् → श्रियः – श्रयति हरिं या सा श्रीः तस्याः (लक्ष्म्याः) निवासः – निवसन्ति जना अस्मिन् , जगतां निवासो जगन्निवासः (विश्वाधारभूतः) । श्रीमति – श्रीः विद्यते यस्मिन् तत् श्रीमत् तस्मिन् ( सर्वसमृद्धियुक्ते ) । शासितुम् – √शास् + तुमुन् । वसन् – √वस् + शतृ (निवासं कुर्वन् ) । अवतरन्तम् – अव + √तॄ + शतृ ( आयान्तम् ) । हिरण्यगर्भाङ्गभुवं – हिरण्यस्य गर्भः हिरण्यगर्भः, अङ्गात् भवति इति अङ्गभूः, हिरण्यगर्भस्य अङ्गभूः हिरण्यगर्भाङ्गभूः, तम् । ददर्श – अपश्यत् ।

डॉ० निर्मलकु० झा, स० प्राचार्य (साहित्य)
04-06-2021
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

04-06-2021

साहित्य (प्रतिष्ठा)	शास्त्री - III

अष्टम पत्रम् ।	मालविकाग्निमित्रम् ।	श्लोकव्याख्या ।

"अलमन्यथा गृहीत्वा न खलु मनस्विनि मया प्रयुक्तमिदम् ।
प्रायः समानविद्याः परस्परयशः पुरोभागाः ॥"

प्रथमाङ्कः राज्ञः उक्तिः देवीं धारिणीं प्रति ।

अन्वयः → अन्यथा गृहीत्वा अलम् । मनस्विनि ! इदं मया न खलु प्रयुक्तम् । समानविद्याः प्रायः परस्परयशः पुरोभागाः (भवन्ति) ।

शब्दार्थः व्याकरणञ्च → अन्यथा → न यथा, न वा ।
गृहीत्वा = अवधार्य । अलम् = व्यर्थम् ।
मनस्विनि = भो मानिनि !, मया = अग्निमित्रेण ।
इदं = हरदत्तगणदासयोर्विवादोत्थानं । न प्रयुक्तम् = न ~~उक्तं~~ उपस्थापितम् । समानविद्याः = तुल्यज्ञानिनो जनाः ।
प्रायः = आधिक्येन । परस्परयशः पुरोभागाः = परस्परनिन्दकाः भवन्ति ।
मनस्विनि → प्रशस्तं मनः अस्य अस्ति इति मनस्विनी तत्सम्बुद्धौ । समानविद्याः → समाना विद्या येषां ते ।
अलङ्कारः = अर्थान्तरन्यासः ।
छन्दः = आर्या जातिः ।

[signature] 04-06-21

डॉ० निर्मल कुमार झा, सह प्राचार्य ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

अनिवार्यपत्रम् ।
व्याकरणछात्रहेतवे ।

शास्त्री II

04-06-2021

रघुवंशम् ।

श्लोकव्याख्या ।

"कश्चित्कराभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफम् ।
रजोभिरन्तः परिवेषबन्धि लीलारविन्दं भ्रमयाञ्चकार ॥"

सन्दर्भः → प्रस्तुतमिदं पद्यं कविकुलगुरुकालिदासप्रणीतस्य 'रघुवंश' महाकाव्यस्येन्दुमतीस्वयंवरवर्णनप्रसङ्गात् षष्ठसर्गात् उद्धृतमस्ति ।

प्रसङ्गः → कविरत्र इन्दुमतीं दृष्ट्वा कस्यचिद् राज्ञः शृङ्गारचेष्टा-प्रकारमेव वर्णयति ।

भावार्थः → कोऽपि राजाकरे कमलमादाय तद् मण्डलाकारं भ्रामयित्वा इन्दुमतीमालोकितवान् ।

तात्पर्यं → राजकुमारीमिन्दुमतीं प्रति प्रदर्शितप्रेमरतां नृपतीनां विविध-शृङ्गारचेष्टाविशेषाः तरुपल्लवेव प्रेमाग्रदूतिकाः सदृशाः बभूवुरिति भावः ।

श्लोकान्वयः → कश्चित् कराभ्याम् उपगूढनालम् आलोलपत्राभिहतद्विरेफं रजोभिः अन्तः परिवेषबन्धि लीलारविन्दं भ्रमयाञ्चकार ।

शब्दार्थः व्याकरणञ्च → उपगूढनालम् → उपगूढं नालं यस्य तत् = धारितपद्मदण्डम् । आलोलपत्राभिहतद्विरेफम् → आलोलानि च तानि पत्राणि, तैः अभिहिताः द्विरेफाः येन तत् = चञ्चलपत्रताडि-मधुपं । रजोभिः = कुसुमपरागैः । परिवेषबन्धि = मण्डलाकारम्

विशेषः → अस्मिन् श्लोके शृङ्गाररसः, वैदर्भीरीतिः, माधुर्यगुणः, स्वभावोक्तिरलङ्कारः, उपजातिवृत्तञ्च ।

04-06-2021

डॉ० निर्मलकुमार झा, (स० प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

04-08-2021

अनिवार्यप्रथमपत्रम् ।   उपशास्त्री

संस्कृतानुवादः →

कल यानि विगत दिन से मैं कुछ विशिष्ट शब्दों के वचन-निर्धारण सम्बन्धी नियमों का उल्लेख कर रहा हूँ। अब आगे →

1. प्रमाण, स्थान, पात्र, पद, आस्पद आदि शब्द जब विधेय के रूप में वाक्य में प्रयुक्त होते हैं, तब वे सदा नपुंसक लिङ्ग, एकवचन में रहते हैं। यथा → गुणाः पूजास्थानम् । वेदाः प्रमाणम् । विश्वासभाजनम् । प्रेमास्पदम् । प्राचार्यपदम् । सज्जनानां पात्रम् ।
2. प्रदेशों के नाम प्रायः बहुवचनान्त होते हैं। यथा → काश्मीरेषु, कलिङ्गाः साहसिकः बंगेषु ।
3. कति, यति, तति शब्द बहुवचन होते हैं। यथा → कितने छात्र → कति छात्राः ? जितने छात्र उतने अध्यापक हैं → यति छात्राः तति अध्यापकाः सन्ति ।
4. नेत्र, श्रोत्र, हस्त, पाद आदि अर्थवाले शब्द द्विवचन में प्रयुक्त होते हैं। यथा → वह आँख से अन्धा है → सः नेत्राभ्याम् अन्धः अस्ति । वह कानों से सुनता है → सः श्रोत्राभ्याम् / कर्णाभ्याम् शृणोति ।
5. प्राण, माला, दार, अक्षत जैसे शब्द सदा पुल्लिङ्ग, बहुवचन होते हैं। यथा → धनैरपि रक्षेत् दारान् ।
प्राणेभ्योऽपि प्रियतरः, श्रेष्ठतरः वा ।
अक्षताश्च सुश्रेष्ठाः ।
कुंकुमालाः सुशोभिताः ।

[signature] 04-08-21

डॉ० निर्मल कुमार झा, सं० प्राचार्य
रा० उ० सं० महावि० सुखसेना, पूर्णिया

शिष्टः अपरेद्युः ।